श्री शिव पादादिकेशांत वर्णन स्तोत्रं

श्री शिव पादादिकेशांत वर्णन स्तोत्रं

कळ्याणं नो विधत्तां कटकतटलसत्कल्पवाटीनिकुंज-
-क्रीडासंसक्तविद्याधरनिकरवधूगीतरुद्रापदानः |
तारैर्हेरंबनादैस्तरळितनिनदत्तारकारातिकेकी
कैलासः शर्वनिर्वृत्यभिजनकपदः सर्वदा पर्वतेंद्रः || 1 ||

यस्य प्राहुः स्वरूपं सकलदिविषदां सारसर्वस्वयोगं
यस्येषुः शार्ङ्गधन्वा समजनि जगतां रक्षणे जागरूकः |
मौर्वी दर्वीकराणामपि च परिबृढः पूस्त्रयी सा च लक्ष्यं
सोऽव्यादव्याजमस्मानशिवभिदनिशं नाकिनां श्रीपिनाकः || 2 ||

आतंकावेगहारी सकलदिविषदामंघ्रिपद्माश्रयाणां
मातंगाद्युग्रदैत्यप्रकरतनुगलद्रक्तधाराक्तधारः |
क्रूरः सूरायुतानामपि च परिभवं स्वीयभासा वितन्व-
-न्घोराकारः कुठारो दृढतरदुरिताख्याटवीं पाटयेन्नः || 3 ||

कालारातेः कराग्रे कृतवसतिरुरःशाणशातो रिपूणां
काले काले कुलाद्रिप्रवरतनयया कल्पितस्नेहलेपः |
पायान्नः पावकार्चिःप्रसरसखमुखः पापहंता नितांतं
शूलः श्रीपादसेवाभजनरसजुषां पालनैकांतशीलः || 4 ||

देवस्यांकाश्रयायाः कुलगिरिदुहितुर्नेत्रकोणप्रचार-
-प्रस्तारानत्युदारान्पिपठिषुरिव यो नित्यमत्यादरेण |
आधत्ते भंगितुंगैरनिशमवयवैरंतरंगं समोदं
सोमापीडस्य सोऽयं प्रदिशतु कुशलं पाणिरंगः कुरंगः || 5 ||

कंठप्रांतावसज्जत्कनकमयमहाघंटिकाघोरघोषैः
कंठारावैरकुंठैरपि भरितजगच्चक्रवालांतराळः |
चंडः प्रोद्दंडशृंगः ककुदकबलितोत्तुंगकैलासशृंगः
कंठेकालस्य वाहः शमयतु शमलं शाश्वतः शाक्वरेंद्रः || 6 ||

निर्यद्दानांबुधारापरिमलतरलीभूतरोलंबपाली-
-झंकारैः शंकराद्रेः शिखरशतदरीः पूरयन्भूरिघोषैः |
शार्वः सौवर्णशैलप्रतिमपृथुवपुः सर्वविघ्नापहर्ता
शर्वाण्याः पूर्वसूनुः स भवतु भवतां स्वस्तिदो हस्तिवक्त्रः || 7 ||

यः पुण्यैर्देवतानां समजनि शिवयोः श्लाघ्यवीर्यैकमत्या-
-द्यन्नाम्नि श्रूयमाणे दितिजभटघटा भीतिभारं भजंते |
भूयात्सोऽयं विभूत्यै निशितशरशिखापाटितक्रौंचशैलः
संसारागाधकूपोदरपतितसमुत्तारकस्तारकारिः || 8 ||

आरूढः प्रौढवेगप्रविजितपवनं तुंगतुंगं तुरंगं
चेलं नीलं वसानः करतलविलसत्कांडकोदंडदंडः |
रागद्वेषादिनानाविधमृगपटलीभीतिकृद्भूतभर्ता
कुर्वन्नाखेटलीलां परिलसतु मनःकानने मामकीने || 9 ||

अंभोजाभ्यां च रंभारथचरणलताद्वंद्वकुंभींद्रकुंभै-
-र्बिंबेनेंदोश्च कंबोरुपरि विलसता विद्रुमेणोत्पलाभ्यां |
अंभोदेनापि संभावितमुपजनिताडंबरं शंबरारेः
शंभोः संभोगयोग्यं किमपि धनमिदं संभवेत्संपदे नः || 10 ||

वेणीसौभाग्यविस्मापिततपनसुताचारुवेणीविलासा-
-न्वाणीनिर्धूतवाणीकरतलविधृतोदारवीणाविरावान् |
एणीनेत्रांतभंगीनिरसननिपुणापांगकोणानुपासे
शोणान्प्राणानुदूढप्रतिनवसुषमाकंदलानिंदुमौळेः || 11 ||

नृत्तारंभेषु हस्ताहतमुरजधिमिद्धिंकृतैरत्युदारै-
-श्चित्तानंदं विधत्ते सदसि भगवतः संततं यः स नंदी |
चंडीशाद्यास्तथान्ये चतुरगुणगणप्रीणितस्वामिसत्का-
-रोत्कर्षोद्यत्प्रसादाः प्रमथपरिबृढाः पांतु संतोषिणो नः || 12 ||

मुक्तामाणिक्यजालैः परिकलितमहासालमालोकनीयं
प्रत्युप्तानर्घरत्नैर्दिशि दिशि भवनैः कल्पितैर्दिक्पतीनां |
उद्यानैरद्रिकन्यापरिजनवनितामाननीयैः परीतं
हृद्यं हृद्यस्तु नित्यं मम भुवनपतेर्धाम सोमार्धमौळेः || 13 ||

स्तंभैर्जंभारिरत्नप्रवरविरचितैः संभृतोपांतभागं
शुंभत्सोपानमार्गं शुचिमणिनिचयैर्गुंभितानल्पशिल्पं |
कुंभैः संपूर्णशोभं शिरसि सुघटितैः शातकुंभैरपंकैः
शंभोः संभावनीयं सकलमुनिजनैः स्वस्तिदं स्यात्सदो नः || 14 ||

न्यस्तो मध्ये सभायाः परिसरविलसत्पादपीठाभिरामो
हृद्यः पादैश्चतुर्भिः कनकमणिमयैरुच्चकैरुज्ज्वलात्मा ||
वासोरत्नेन केनाप्यधिकमृदुतरेणास्तृतो विस्तृतश्रीः
पीठः पीडाभरं नः शमयतु शिवयोः स्वैरसंवासयोग्यः || 15 ||

आसीनस्याधिपीठं त्रिजगदधिपतेरंघ्रिपीठानुषक्तौ
पाथोजाभोगभाजौ परिमृदुलतलोल्लासिपद्मादिरेखौ |
पातां पादावुभौ तौ नमदमरकिरीटोल्लसच्चारुहीर-
-श्रेणीशोणायमानोन्नतनखदशकोद्भासमानौ समानौ || 16 ||

यन्नादो वेदवाचां निगदति निखिलं लक्षणं पक्षिकेतु-
-र्लक्ष्मीसंभोगसौख्यं विरचयति ययोश्चापरे रूपभेदे |
शंभोः संभावनीये पदकमलसमासंगतस्तुंगशोभे
मांगळ्यं नः समग्रं सकलसुखकरे नूपुरे पूरयेतां || 17 ||

अंगे शृंगारयोनेः सपदि शलभतां नेत्रवह्नौ प्रयाते
शत्रोरुद्धृत्य तस्मादिषुधियुगमधो न्यस्तमग्रे किमेतत् |
शंकामित्थं नतानाममरपरिषदामंतरंकूरयत्त-
-त्संघातं चारु जंघायुगमखिलपतेरंहसां संहरेन्नः || 18 ||

जानुद्वंद्वेन मीनध्वजनृवरसमुद्रोपमानेन साकं
राजंतौ राजरंभाकरिकरकनकस्तंभसंभावनीयौ |
ऊरू गौरीकरांभोरुहसरससमामर्दनानंदभाजौ
चारू दूरीक्रियास्तां दुरितमुपचितं जन्मजन्मांतरे नः || 19 ||

आमुक्तानर्घरत्नप्रकरकरपरिष्वक्तकळ्याणकांची-
-दाम्ना बद्धेन दुग्धद्युतिनिचयमुषा चीनपट्टांबरेण |
संवीते शैलकन्यासुचरितपरिपाकायमाणे नितंबे
नित्यं नर्नर्तु चित्तं मम निखिलजगत्स्वामिनः सोममौळेः || 20 ||

संध्याकालानुरज्यद्दिनकरसरुचा कालधौतेन गाढं
व्यानद्धः स्निग्धमुग्धः सरसमुदरबंधेन वीतोपमेन |
उद्दीप्तैः स्वप्रकाशैरुपचितमहिमा मन्मथारेरुदारो
मध्यो मिथ्यार्थसभ्यङ्गम दिशतु सदा संगतिं मंगळानां || 21 ||

नाभीचक्रालवालान्नवनवसुषमादोहदश्रीपरीता-
-दुद्गच्छंती पुरस्तादुदरपथमतिक्रम्य वक्षः प्रयांति |
श्यामा कामागमार्थप्रकथनलिपिवद्भासते या निकामं
सा मा सोमार्धमौळेः सुखयतु सततं रोमवल्लीमतल्ली || 22 ||

आश्लेषेष्वद्रिजायाः कठिनकुचतटीलिप्तकाश्मीरपंक-
-व्यासंगादुद्यदर्कद्युतिभिरुपचितस्पर्धमुद्दामहृद्यं |
दक्षारातेरुदूढप्रतिनवमणिमालावलीभासमानं
वक्षो विक्षोभिताघं सततनतिजुषां रक्षतादक्षतं नः || 23 ||

वामांके विस्फुरंत्याः करतलविलसच्चारुरक्तोत्पलायाः
कांताया वामवक्षोरुहभरशिखरोन्मर्दनव्यग्रमेकं |
अन्यांस्त्रीनप्युदारान्वरपरशुमृगालंकृतानिंदुमौळे-
-र्बाहूनाबद्धहेमांगदमणिकटकानंतरालोकयामः || 24 ||

संभ्रांतायाः शिवायाः पतिविलयभिया सर्वलोकोपतापा-
-त्संविग्नस्यापि विष्णोः सरभसमुभयोर्वारणप्रेरणाभ्यां |
मध्ये त्रैशंकवीयामनुभवति दशां यत्र हालाहलोष्मा
सोऽयं सर्वापदां नः शमयतु निचयं नीलकंठस्य कंठः || 25 ||

हृद्यैरद्रींद्रकन्यामृदुदशनपदैर्मुद्रितो विद्रुमश्री-
-रुद्द्योतंत्या नितांतं धवलधवलया मिश्रितो दंतकांत्या |
मुक्तामाणिक्यजालव्यतिकरसदृशा तेजसा भासमानः
सद्योजातस्य दद्यादधरमणिरसौ संपदां संचयं नः || 26 ||

कर्णालंकारनानामणिनिकररुचां संचयैरंचितायां
वर्ण्यायां स्वर्णपद्मोदरपरिविलसत्कर्णिकासंनिभायां |
पद्धत्यां प्राणवायोः प्रणतजनहृदंभोजवासस्य शंभो-
-र्नित्यं नश्चित्तमेतद्विरचयतु सुखेनासिकां नासिकायां || 27 ||

अत्यंतं भासमाने रुचिरतररुचां संगमात्सन्मणीना-
-मुद्यच्चंडांशुधामप्रसरनिरसनस्पष्टदृष्टापदाने |
भूयास्तां भूतये नः करिवरजयिनः कर्णपाशावलंबे
भक्तालीभालसज्जज्जनिमरणलिपेः कुंडले कुंडले ते || 28 ||

याभ्यां कालव्यवस्था भवति तनुमतां यो मुखं देवतानां
येषामाहुः स्वरूपं जगति मुनिवरा देवतानां त्रयीं तां |
रुद्राणीवक्त्रपंकेरुहसततविहारोत्सुकेंदिंदिरेभ्य-
-स्तेभ्यस्त्रिभ्यः प्रणामांजलिमुपरचये त्रीक्षणस्येक्षणेभ्यः || 29 ||

वामं वामांकगाया वदनसरसिजे व्यावलद्वल्लभाया
व्यानम्रेष्वन्यदन्यत्पुनरलिकभवं वीतनिःशेषरौक्ष्यं |
भूयो भूयोपि मोदान्निपतदतिदयाशीतलं चूतबाणे
दक्षारेरीक्षणानां त्रयमपहरतादाशु तापत्रयं नः || 30 ||

यस्मिन्नर्धेंदुमुग्धद्युतिनिचयतिरस्कारनिस्तंद्रकांतौ
काश्मीरक्षोदसंकल्पतमिव रुचिरं चित्रकं भाति नेत्रं |
तस्मिन्नुल्लीलचिल्लीनटवरतरुणीलास्यरंगायमाणे
कालारेः फालदेशे विहरतु हृदयं वीतचिंतांतरं नः || 31 ||

स्वामिन्नंगामिवांगीकुरु तव शिरसा मामपीत्यर्थयंतीं
धन्यां कन्यां खरांशोः शिरसि वहति किं न्वेष कारुण्यशाली |
इत्थं शंकां जनानां जनयदतिघनं कैशिकं कालमेघ-
-च्छायं भूयादुदारं त्रिपुरविजयिनः श्रेयसे भूयसे नः || 32 ||

शृंगाराकल्पयोग्यैः शिखरिवरसुतासत्सखीहस्तलूनैः
सूनैराबद्धमालावलिपरिविलसत्सौरभाकृष्टभृंगं |
तुंगं माणिक्यकांत्या परिहसितसुरावासशैलेंद्रशृंगं
संघं नः संकटानां विघटयतु सदा कांकटीकं किरीटं || 33 ||

वक्राकारः कलंकी जडतनुरहमप्यंघ्रिसेवानुभावा-
-दुत्तंसत्वं प्रयातः सुलभतरघृणास्यंदिनश्चंद्रमौळेः |
तत्सेवंतां जनौघाः शिवमिति निजयावस्थयैव ब्रुवाणं
वंदे देवस्य शंभोर्मुकुटसुघटितं मुग्धपीयूषभानुं || 34 ||

कांत्या संफुल्लमल्लीकुसुमधवळया व्याप्य विश्वं विराज-
-न्वृत्ताकारो वितन्वन्मुहुरपि च परां निर्वृतिं पादभाजां |
सानंदं नंदिदोष्णा मणिकटकवता वाह्यमानः पुरारेः
श्वेतच्छत्राख्यशीतद्युतिरपहरतादापदस्तापदा नः || 35 ||

दिव्याकल्पोज्ज्वलानां शिवगिरिसुतयोः पार्श्वयोराश्रितानां
रुद्राणीसत्सखीनां मदतरलकटाक्षांचलैरंचितानां |
उद्वेल्लद्बाहुवल्लीविलसनसमये चामरांदोलनीना-
-मुद्भूतः कंकणालीवलयकलकलो वारयेदापदो नः || 36 ||

स्वर्गौकःसुंदरीणां सुललितवपुषां स्वामिसेवापराणां
वल्गद्भूषाणि वक्रांबुजपरिविगलन्मुग्धगीतामृतानि |
नित्यं नृत्तान्युपासे भुजविधुतिपदन्यासभावावलोक-
-प्रत्युद्यत्प्रीतिमाद्यत्प्रमथनटनटीदत्तसंभावनानि || 37 ||

स्थानप्राप्त्या स्वराणां किमपि विशदतां व्यंजयन्मंजुवीणा-
-स्वानावच्छिन्नतालक्रममम्रतमिवास्वाद्यमानं शिवाभ्यां |
नानारागातिहृद्यं नवरसमधुरस्तोत्रजातानुविद्धं
गानं वीणामहर्षेः कलमतिललितं कर्णपूरयतां नः || 38 ||

चेतो जातप्रमोदं सपदि विदधती प्राणिनां वाणिनीनां
पाणिद्वंद्वाग्रजाग्रत्सुललितरणितस्वर्णतालानुकूला |
स्वीयारावेण पाथोधररवपटुना नादयंती मयूरीं
मायूरी मंदभावं मणिमुरजभवा मार्जना मार्जयेन्नः || 39 ||

देवेभ्यो दानवेभ्यः पितृमुनिपरिषत्सिद्धविद्याधरेभ्यः
साध्येभ्यश्चारणेभ्यो मनुजपशुपतज्जातिकीटादिकेभ्यः |
श्रीकैलासप्ररूढास्तृणविटपिमुखाश्चापि ये संति तेभ्यः
सर्वेभ्यो निर्विचारं नतिमुपरचये शर्वपादाश्रयेभ्यः || 40 ||

ध्यायन्नित्थं प्रभाते प्रतिदिवसमिदं स्तोत्ररत्नं पठेद्यः
किं वा ब्रूमस्तदीयं सुचरितमथवा कीर्तयामः समासात् |
संपज्जातं समग्रं सदसि बहुमतिं सर्वलोकप्रियत्वं
संप्राप्यायुःशतांते पदमयति परब्रह्मणो मन्मथारेः || 41 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्री शिव पादादिकेशांतवर्णन स्तोत्रं ||